# .. Goddess Lalita 108 names..

# ॥ ललिता अष्टोत्तरशत नामवलिः ॥

॥ श्रीरस्तु ॥

॥ अथ श्रीललिताष्टोत्तरशतनामावलिः ॥

ॐ-ऐं-ह्रीं-श्रीं ।

रजताचलशृंगाग्रमध्यस्थायै नमो नमः ।
हिमाचलमहावंशपावनायै नमो नमः ।
शंकरार्धांगसौंदर्यशरीरायै नमो नमः ।
लसन्मरकतस्वच्छविग्रहायै नमो नमः ।
महातिशयसौंदर्यलावण्यायै नमो नमः ।
शशांकशेखरप्राणवल्लभायै नमो नमः ।
सदापंचदशात्मैक्यस्वरूपायै नमो नमः ।
वज्रमाणिक्यकटककिरीटायै नमो नमः ।
कस्तूरीतिलकोल्लासनिटिलायै नमो नमः ।
भस्मरेखांकितलसन्मस्तकायै नमो नमः । १०
विकचांभोरुहदललोचनायै नमो नमः ।
शरच्चांपेयपुष्पाभनासिकायै नमो नमः ।
लसत्कांचनताटंकयुगलायै नमो नमः ।
मणिदर्पणसंकाशकपोलायै नमो नमः ।
ताम्बूलपूरितस्मेरवदनायै नमो नमः ।
सुपक्वदाडिमीबीजरदनायै नमो नमः ।
कंबुपूगसमच्छायकंधरायै नमो नमः ।
स्थूलमुक्ताफलोदारसुहारायै नमो नमः ।
गिरीशबद्धमांगल्यमंगलायै नमो नमः ।
पद्मपाशांकुशलसत्कराब्जायै नमो नमः । २०
पद्मकैरवमंदारसुमालिन्यै नमो नमः ।
सुवर्णकुंभयुग्माभसुकुचायै नमो नमः ।
रमणीयचतुर्बाहुसंयुक्तायै नमो नमः ।
कनकांगदकेयूरभूषितायै नमो नमः ।
बृहत्सौवर्णसौंदर्यवसनायै नमो नमः ।

बृहन्नितंबविलसज्जघनायै नमो नमः ।
सौभाग्यजातशृंगारमध्यमायै नमो नमः ।
दिव्यभूषणसंदोहरंजितायै नमो नमः ।
पारिजातगुणाधिक्यपदाब्जायै नमो नमः ।
सुपद्मरागसंकाशचरणायै नमो नमः । ३०
कामकोटिमहापद्मपीठस्थायै नमो नमः ।
श्रीकण्ठनेत्रकुमुदचंद्रिकायै नमो नमः ।
संचारमररमावाणीवीजितायै नमो नमः ।
भक्तरक्षणदाक्षिण्यकटाक्षायै नमो नमः ।
भूतेशालिंगनोद्भूतपुलकांग्यै नमो नमः ।
अनंगजनकापांगवीक्षणायै नमो नमः ।
ब्रह्मोपेंद्रशिरोरत्नरंजितायै नमो नमः ।
शचीमुख्यामरवधूसेवितायै नमो नमः ।
लीलाकल्पितब्रह्मांडमंडलायै नमो नमः ।
अमृतादिमहाशक्तिसंवृतायै नमो नमः । ४०
एकातपत्रसाम्राज्यदायिकायै नमो नमः ।
सनकादिसमाराध्यपादुकायै नमो नमः ।
देवर्षिभिस्स्तूयमानवैभवायै नमो नमः ।
कलशोद्भवदुर्वासःपूजितायै नमो नमः ।
मत्तेभवक्त्रषड्वक्त्रवत्सलायै नमो नमः ।
चक्रराजमहायंत्रमध्यवर्तिन्यै नमो नमः ।
चिदग्निकुंडसंभूतसुदेहायै नमो नमः ।
शशांकखंडसंयुक्तमकुटायै नमो नमः ।
मत्तहंसवधूमंदगमनायै नमो नमः ।
वंदारुजनसंदोहवंदितायै नमो नमः । ५०
अंतर्मुखजनानंदफलदायै नमो नमः ।
पतिव्रतांगनाभीष्टफलदायै नमो नमः ।
अव्याजकरुणापूरपूरितायै नमो नमः ।
नितांतसच्चिदानंदसंयुक्तायै नमो नमः ।
सहस्रसूर्यसंयुक्तप्रकाशायै नमो नमः ।
रत्नचिंतामणिगृहमध्यस्थायै नमो नमः ।
हानिवृद्धिगुणाधिक्यरहितायै नमो नमः ।
महापद्माटवीमध्यनिवासायै नमो नमः ।
जाग्रत्स्वप्नसुषुप्तीनां साक्षिभूत्यै नमो नमः ।
महापापौघपापानां विनाशिन्यै नमो नमः । ६०
दुष्टभीतिमहाभीतिभंजनायै नमो नमः ।

समस्तदेवदनुजप्रेरकायै नमो नमः ।
समस्तहृदयांभूजनिलयायै नमो नमः ।
अनाहतमहापद्ममंदिरायै नमो नमः ।
सहस्रारसरोजातवासितायै नमो नमः ।
पुनरावृत्तिरहितपुरस्थायै नमो नमः ।
वाणीगायत्रीसावित्रीसन्नुतायै नमो नमः ।
रमाभूमिसुताराध्यपदाब्जायै नमो नमः ।
लोपामुद्रार्चितश्रीमच्चरणायै नमो नमः ।
सहस्ररतिसौंदर्यशरीरायै नमो नमः । ७०
भावनामात्रसंतुष्टहृदयायै नमो नमः ।
सत्यसंपूर्णविज्ञानसिद्धिदायै नमो नमः ।
श्रीलोचनकृतोल्लासफलदायै नमो नमः ।
श्रीसुधाब्धिमणिद्वीपमध्यगायै नमो नमः ।
दक्षाध्वरविनिर्भेदसाधनायै नमो नमः ।
श्रीनाथसोदरीभूतशोभितायै नमो नमः ।
चंद्रशेखरभक्तार्तिभंजनायै नमो नमः ।
सर्वोपाधिविनिर्मुक्तचैतन्यायै नमो नमः ।
नामपारयणाभीष्टफलदायै नमो नमः ।
सृष्टिस्थितितिरोधानसंकल्पायै नमो नमः । ८०
श्रीषोडशाक्षरीमंत्रमध्यगायै नमो नमः ।
अनाद्यंतस्वयंभूतदिव्यमूर्त्यै नमो नमः ।
भक्तहंसपरिमुख्यवियोगायै नमो नमः ।
मातृमंडलसंयुक्तललितायै नमो नमः ।
भंडदैत्यमहासत्त्वनाशनायै नमो नमः ।
क्रूरभंडशिरच्छेदनिपुणायै नमो नमः ।
धात्रच्युतसुराधीशसुखदायै नमो नमः ।
चंडमुंडनिशुंभादिखंडनायै नमो नमः ।
रक्ताक्षरक्तजिह्वादिशिक्षणायै नमो नमः ।
महिषासुरदोर्वीर्यनिग्रहायै नमो नमः । ९०
अभ्रकेशमहोत्साहकारणायै नमो नमः ।
महेशयुक्तनटनतत्परायै नमो नमः ।
निजभर्तृमुखांभोजचिंतनायै नमो नमः ।
वृषभध्वजविज्ञानभावनायै नमो नमः ।
जन्ममृत्युजरारोगभंजनायै नमो नमः ।
विधेयमुक्तविज्ञानसिद्धिदायै नमो नमः ।
कामक्रोधादिषड्वर्गनाशनायै नमो नमः ।

राजराजार्चितपदसरोजायै नमो नमः ।
सर्ववेदांतसंसिद्धसुतत्वायै नमो नमः । १००
श्रीवीरभक्तविज्ञानविधानायै नमो नमः ।
अशेषदुष्टदनुजसूदनायै नमो नमः ।
साक्षाच्छ्रीदक्षिणामूर्तिमनोज्ञायै नमो नमः ।
हयमेधाग्रसंपूज्यमहिमायै नमो नमः ।
दक्षप्रजापतिसुतवेषाढ्यायै नमो नमः ।
सुमबाणेक्षुकोदंडमंडितायै नमो नमः ।
नित्ययौवनमांगल्यमंगलायै नमो नमः ।
महादेवसमायुक्तशरीरायै नमो नमः ।
महादेवरतौत्सुक्यमहादेव्यै नमो नमः ।

॥ श्रीललिताष्टोत्तरशतनामावलिः संपूर्णा ॥

---

Encoded by Sujatha Ramakrishna sujatha.ramakrishna@gsa.gov

---

Please send corrections to sanskrit@cheerful.com
Last updated November 20, 2011
http://sanskritdocuments.org